# ७ जनजातीयाः यायावराः परिकल्पितवासाः समुदायाः च



द्वितीये तृतीये चतुर्थे च अध्याये भवद्भिः दृष्टं यत् केन प्रकारेण राज्यानाम् उत्थानं पतनं च अभवत् । एतस्मिन् ऊहापोहे एव कलानां शिल्पानाम् उत्पादक-गतिविधीनां च नवीनाः जातयः नगरेषु ग्रामेषु विकासं प्राप्नुवत्यः आसन् । एकस्मिन् दीर्घकालिके अन्तराले अनेकानि महत्त्वपूर्णानि राजनैतिकानि सामाजिकानि आर्थिकानि च परिवर्तनानि अभवन् । परन्तु सामाजिकानि परिवर्तनानि सर्वत्र समानानि न आसन् । यतोहि अनेकविधाः समाजाः अनेकविधैः प्रकारैः विकसिताः अभवन् । एवं कथं तथा च किमर्थम् अभवत् एतस्य अवगमनं महत्त्वपूर्णम् अस्ति ।

चित्रम् – १

*काश्चन जातयः अस्थिरवासाः आसन् एवं च स्थानात् स्थानान्तरं प्रति भ्रमणं कुर्वन्ति स्म ।*



अस्य उपमहाद्वीपस्य विशालतमे भागे समाजः वर्णनियमानुसारं पूर्वमेव विभाजितः आसीत् । ब्राह्मणैः परामृष्टाः एते नूतननियमाःविशालतमानां राज्यानां राज्ञैः स्वीकृताः आसन् । एतेन उच्चस्य नीचस्य च एवञ्च धनिकस्य तथा च निर्धनस्य मध्ये भेदः वर्धितः । देहल्याः सुल्तानानां तथा च मुगलानां काले श्रेणिबद्धः समाजः अधिकः जटिलः अभवत् ।

## महानगरेभ्यः परम् – जनजातीयः समाजः

निस्सन्देहम्, अन्ये समाजाः अपि अस्मिन् समये विद्यमानाः आसन् । उपमहाद्वीपस्य अनेके समाजाः ब्राह्मणैः परामृष्टान् सामाजिकनियमान् कर्मकाण्डान् च न मन्यन्ते स्म तथा च ते अनेकेषु असमानेषु वर्गेषु अपि न विभक्ताः आसन् । प्रायेण एतादृशाः समाजाः जनजातयः कथ्यन्ते ।

प्रत्येकं जनजातेः सदस्याः सजातितायाः बन्धनेन युक्ताः भवन्ति स्म । अनेकाः जनजातयः कृषिकार्येण स्वीयां जीविकां निर्वहन्ति स्म । कासाञ्चन अपरासां जनजातीनां जनाः आखेटकाः, सङ्ग्राहकाः अथवा पशुपालकाः आसन् । प्रायः ते स्वस्य निवासस्थानस्य प्राकृतिकानां संसाधनानां च पूर्णतया उपयोगं कर्तुम् एतेषां गतिविधीनां सम्मिश्रितं रूपम् आचरन्ति स्म । काश्चन जातयः

उपमहाद्वीपस्य भौतिक-मानचित्रं स्वीकृत्य तानि क्षेत्राणि सूचयन्तु यत्र जनजातीयाः जनाः निवासं कुर्वन्तः स्युः।

अस्थिरवासाः आसन् एवं च स्थानात् स्थानान्तरं प्रति भ्रमणं कुर्वन्ति स्म। जनजातीय-समूहाः संयुक्तरूपेण भूम्यां पशुचारणस्थानेषु (शाद्वलेषु) च नियन्त्रणं कुर्वन्ति स्म तथा च स्वरचितानां नियमानाम् आधारेण परिवारेषु एतत्सर्वं वण्टयन्ति स्म।

अस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु बहव्यः महत्यः जनजातयः विकसिताः अभवन्। सामान्यतः एताः जङ्गलेषु पर्वतेषु मरुस्थलेषु अन्येषु दुर्गमस्थानेषु च निवसन्ति स्म। कदाचित् जातिविभाजने आधारिते अधिकशक्तिशालिभिः समाजैः सह तासाम् आभिमुख्यं भवति स्म। बहुषु विषयेषु एताभिः जनजातिभिः स्वस्य स्वातन्त्र्यं संरक्षितं तथा च स्वस्याः भिन्नसंस्कृतेः संरक्षणं कृतम्।

परन्तु जाति-आधारितः समाजः जनजातीयः समाजः च उभौ अपि स्वस्याः विविधानाम् आवश्यकतानां कृते परस्परम् आश्रितौ अपि आस्ताम्। अनेन सङ्घर्षस्य निर्भरतायाः च सम्बन्धेन उभयपक्षीये समाजे शनैः शनैः परिवर्तनस्य कार्यम् अपि कृतम्।

## जनजातीयाः जनाः के आसन् ?

समकालीनैः इतिहासकारैः तथा च यात्रिभिः जनजातीयानां विषये अतीव न्यूना सूचना प्रदत्ता। काञ्चन अपवादान् त्यजामः चेत् जनजातीयाः जनाः अपि लिखितान् अभिलेखान् न स्थापयन्ति स्म। परन्तु समृद्धानां रीतीनां वाचिक-मौखिकानां च परम्पराणां ते संरक्षणं कुर्वन्ति स्म। प्रत्येकम् अपि नवीना वंशावली एताः परम्पराः दायरूपेण प्राप्नुवन्ति स्म। अद्यतनाः इतिहासकाराः जनजातीयानाम् इतिहासं लेखितुम् एतासां वाचिकपरम्पराणाम् उपयोगम् आरब्धवन्तः सन्ति।

जनजातीयजनाः भारतस्य प्रायेण प्रत्येकम् अपि क्षेत्रे निवसन्ति। कस्याश्चित् अपि एकस्याः जनजात्याः क्षेत्रं प्रभावः च यथासमयं परिवर्तितः भवति स्म। कासाञ्चन प्रभुत्वसम्पन्नानां जनजातीनां बृहत्सु क्षेत्रेषु नियन्त्रणम् आसीत्। पञ्जाबे खोखर-जनजातिः त्रयोदशे चतुर्दशे च शताब्दे अतीव प्रभावशालिनी आसीत्। अत्र अनन्तरं गक्खरजनाः बहुमहत्त्वपूर्णाः अभवन्। सम्राट् अकबरः तेषां प्रमुखं कमालखान-गक्खरं मनसबदार इति घोषितवान्। मुल्ताने तथा च सिन्धे मुगलैः स्वाधीनकरणात् प्राक् लङ्गाहजनानां तथा च अरघुनजनानां प्रभुत्वम् अत्यन्तं विस्तृते क्षेत्रे आसीत्। उत्तर-पश्चिमे "बलोच" इति काचित् एक अपरा विशाला शक्तिशालिनी च जनजातिः आसीत्। एते जनाः पृथक्-पृथक्-प्रमुखाणाम् अनेकेषु लघुषु कुलेषु वण्टिताः आसन्। पश्चिमीहिमालये मेषपालकानां गद्दीजनजातिः निवसति स्म। उपमहाद्वीपस्य सुदूरम् उत्तर-पूर्वीभागे नागानाम् अहोमानां तथा च अन्यासां बह्वीनां जनजातीनां पूर्णतया प्रभुत्वम् आसीत्।




**मानचित्रम् -१**

प्रमुख-भारतीय-जनजातीनां क्षेत्रम्

द्वादशं शताब्दं यावत् वर्तमानयोः बिहार-झारखण्डयोः अनेकेषु क्षेत्रेषु चेराणां नायकत्वस्य उदयः जातः अभवत् । सम्राजः अकबरस्य प्रसिद्धः सेनापतिः राजा मानसिंहः १५९१ तमे वर्षे चोरजनानाम् उपरि आक्रमणं कृत्वा तान् पराजितवान् । तेभ्यः लुण्ठनस्य अत्यधिकं धनादिकम् अपहृतम्, किन्तु तेषां पूर्णतया स्वाधीनकरणं न अभवत् । औरङ्गजेबस्य कार्यकाले मुगलसेनाः चेरजनानां बहूनां दुर्गाणाम् अधिग्रहणम् अकुर्वन् तथा च एतां जनजातिं स्वाधीनम् अकरोत् । अस्मिन् क्षेत्रे निवत्स्यमानासु महत्त्वपूर्णासु जनजातिषु मुण्डाजनजातिः तथा च सन्तालाः आसन् । यद्यपि एते उडीसायां तथा च बङ्गाले अपि निवसन्ति स्म ।

## *कुलम्*

*कुटुम्बानाम् अथवा गृहाणां किञ्चन तादृशः समूहः कुलम् उच्यते । ये एकस्य एव पूर्वजस्य सन्ततयः आसन् इति अधिकारं प्रकटयन्ति । जनजातीय-सङ्घटनानि प्रायः सगोत्रतायाम् अथवा कुलसम्बद्धायां निष्ठायाम् आधारिताः भवन्ति ।*



*चित्रम् २: रात्रौ भीलजनाः हिरणस्य आखेटं कुर्वन्तः सन्ति।*

कर्णाटकस्य तथा च महाराष्ट्रस्य पर्वताः – कोली-बेरादजनजात्योः अन्यासां च जनजातीनां निवासस्थानानि आसन्। कोलीजनाः गुजरातस्य अन्येषु क्षेत्रेषु अपि निवसन्ति स्म। दक्षिणस्य अग्रिमभागेषु कोरागा-वेतर-मारवाराणाम् अन्यजनजातीनां च विशाला जनसङ्ख्या आसीत्।

भीलानां बृहती जनजातिः पश्चिमभारते मध्यभारते च प्रसृता आसीत्। षोडशशताब्दस्य समाप्तिकालं यावत् यदा तेषु बहुषु स्थानेषु एकत्र वासं कुर्वन्तः कृषकाः तथा च भूस्वामिनः जाताः आसन् तदा अपि भीलानाम् अनेकानि कुलानि आखेट-सङ्ग्राहकाः एव आसन्। विद्यमाने छत्तीसगढे मध्यप्रदेशे महाराष्ट्रे आन्ध्रप्रदेशे च गोण्डजनाः अधिकसङ्ख्यायां विस्तीर्णाः आसन्।



## *यायावराः भ्रमणशीलाः च जनाः कथं निवसन्ति स्म ?*

यायावराः पशुचारकाः स्वीयैः जन्तुभिः सह सुदूरं यावत् भ्रमन्ति स्म। तेषां जीवनं दुग्धे तथा च अन्येषु पशुचारिषु उत्पादेषु निर्भरम् आसीत्। ते कृषक-गृहस्थैः सह अन्नस्य वस्त्रस्य पात्राणाम् अपि च एतादृशाणाम् अन्यवस्तूनां कृते ऊर्णस्य घृतस्य च विनिमयम् अपि कुर्वन्ति स्म। केचन यायावराः स्वकीयेषु जन्तुषु वस्तु-वहनस्य कार्यम् अपि कुर्वन्ति स्म। ते एकस्मात् स्थानात् अपरं स्थानं गच्छन् वस्तूनां क्रयणं विक्रयणं च कुर्वन्ति स्म।

**चित्रम् – ३**

भ्रमणशीलानां वणिजां शृङ्खलाः भारतं बाह्यसंसारेण योजयन्ति स्म। अत्र शुष्कफलानि एकत्रीकृत्य उष्ट्रेषु स्थापनं क्रियमाणं वर्तते। मध्य-एशियायाः वणिजः ईदृशानि वस्तूनि भारतं प्रति आनयन्ति स्म तथा च बंजाराजनाः एवञ्च अन्ये वणिजः एतानि स्थानीय-विपणिं पर्यन्तं प्रापयन्ति स्म।

बंजाराजनाः सर्वाधिकाः महत्त्वपूर्णाः वणिक्-यायावराः आसन् । तेषां सार्थसमूहः (पथिकमण्डलम्) 'टाण्डा' इति कथ्यते स्म । सम्राड् अलाउद्दीन-खलजी बंजाराजनाम् उपयोगं नगरस्य विपणिः यावत् अन्नस्य भारवहनाय करोति स्म । सम्राड् जहाँगीरः स्वस्य संस्मरणेषु अलिखत् यत् बंजाराजनाः विभिन्नेभ्यः क्षेत्रेभ्यः वृषभशटकैः अन्नानि ऊढ्वा नगरेषु विक्रीणन्ते स्म । सैन्य-अभियानानां काले ते मुगलसेनायाः कृते खाद्यान्नानां वहनस्य कार्यं कुर्वन्ति स्म । कस्यापि विशालसैन्यस्य कृते १,००,००० वृषभाः अन्नस्य वहनं कुर्वन्तः स्युः।

## बंजाराजनाः (वनचराः)

सप्तदशशताब्दस्य आरम्भे भारतम् आगतवता केनचित् पीटर-मण्डी नामकेन आङ्ग्लवणिजा वर्णनं कृतं वर्तते :

प्रातः अस्माकं मेलनं व्यवसायिनां केनचित् इत्यनेन सह अभवत्, यस्यां १४,००० वृषभाः आसन् । .... एते बंजाराजनाः स्वसम्पूर्णपरिवारेण सह एव यात्रां कुर्वन्ति स्म । कस्मिँश्चित् टाण्डा इत्यस्मिन् बहवः कुटुम्बाः भवन्ति । तेषां जीवनस्य शैली तैः भारवाहकैः सह मिलति स्म ये निरन्तरम् एकस्मात् स्थानात् अपरं स्थानं प्रति गमनं कुर्वन्ति । धेनवः वृषभाः तेषां स्वकीयाः भवन्ति स्म । बहुधा ते वणिग्भिः भाटकत्वेन नियुक्ताः क्रियन्ते । परन्तु बहुशः स्वयं व्यापारिणः भवन्ति । अन्नं यत्र अल्पमूल्येन प्राप्यते, ततः ते क्रीणन्ति तथा च तत्र नयन्ति यत्र एतत् अधिकमूल्येन प्राप्यते । ततः ते एतादृशानि वस्तूनि क्रीणन्ति यानि कुत्रचित् अन्यत्र लाभरूपेण विक्रेतुम् अर्हेयुः । ..... टाण्डा इत्यस्यां षड्शततः सप्तशतं यावत् जनाः भवितुं शक्नुवन्ति । ते प्रतिदिनम् षष्ट अथवा सप्तमीलपरिमितात् अधिकां यात्रां न कुर्वन्ति स्म, एतावत् एव न शीतकाले अपि । स्वस्य धेनोः वृषभात् वा वस्तूनि अवतारणस्य अनन्तरं तान् ते मुक्तरूपेण चरणाय त्यजन्ति । यतोहि अत्र भूमिः पर्याप्ता अस्ति अपि च तेषाम् अवरोधकः कश्चन अपि नास्ति ।

? ज्ञानं कुर्वन्तु यत् अद्यत्वे ग्रामात् नगराणि यावत् अन्नस्य नयनस्य कार्यं कथं भवति । एतत् बंजाराजनानां कार्यशैल्या केन प्रकारेण भिन्नम् अथवा समानम् आस्ति ?

***यायावराः भ्रमणशीलसमूहाः च***

*यायावराः भ्रमणशीलाः भवन्ति । तेषु केचन पशुचारिणः भवन्ति ये स्वस्य अजमेषसमूहेन पशुवृन्देन च सह एकस्मात् पशुचारणस्थानात् पशुचारणस्थानान्तरं भ्रमणं कुर्वन्ति । एवम् एव शिल्पकाराः भाण्डवाहाः नर्तक-गायकाः एवञ्च अन्ये मनोरञ्जकदर्शकाः भ्रमणशीलसमूहाः स्वस्य कार्यं कुर्वन्तः एकस्मात् स्थानात् अन्यस्थानस्य यात्रां कुर्वन्ति । यायावराः भ्रमणशीलसमूहाः च द्वौ अपि प्रायः तत्र प्रत्यागच्छतः यत्र तौ गतवर्षे अपि भ्रमणं कृतवन्तौ आस्ताम् ।*



*चित्रम् – ४*

*कांस्यनिर्मिता मकरकुटी कोण्ड-जनजातिः, उडीसा*

बहवः पशुचारिण्यः जनजातयः पशून् अश्वसदृशान् च जन्तून् पालयन्ति तथा च तेषां विक्रयणं सम्पन्नजनानां कृते कुर्वन्ति स्म । भाण्डवाहानां विभिन्नजातयः अपि एकस्मात् ग्रामात् अन्यं ग्रामं प्रति भ्रमणं कुर्वन्ति स्म । एते जनाः रज्जुं, शरकाण्डस्य वस्तूनि, पलालस्य कटान्, स्थूलस्यूतान् निर्मान्ति तेषां विक्रयणं च कुर्वन्ति । यदा कदा भिक्षुकाः अपि भ्रमणशीलानां वाणिज्यं कुर्वन्ति स्म । नर्तकानां गायकानाम् अन्यदर्शकाणां च जातयः अपि आसन् याः विभिन्नेषु नगरेषु ग्रामेषु अर्जनाय स्वस्य कलानां प्रदर्शनं कुर्वन्ति स्म ।

## परिवर्तमानः समाजः – नूतनजातयः एवञ्च वर्गाः

यथा यथा अर्थव्यवस्थायाः समाजस्य आवश्यकताः च वर्धिताः, नूतनकौशलवतां जनानाम् आवश्यकता अभवत् । वर्णानाम् अन्तः लघ्वीनां जातीनां प्रादुर्भावः अपि अभवत् । उदाहरणार्थं ब्राह्मणानां मध्ये नवीनाः जातयः प्रकटिताः अभवन् । अपरस्मिन् पक्षे अनेकेषां जनजातीनां सामाजिकसमूहानां च जातिविभाजिते समाजे सम्मेलनं कृतम् । अपि च तेषां जातित्वं निर्धारितम् । ब्राह्मणैः विशेषज्ञता-प्राप्तान् शिल्पिनः सुवर्णकारान्, लोहकारान्, तक्षकान् राजतक्षकान् अपि जातिरूपेण मान्यता प्रदत्ता । वर्णानाम् अपेक्षया जातिः समाजस्य सङ्गठनस्य आधाररूपा अभवत् ।

**जात्यां विचार-विमर्शः**

वर्तमान-तमिल्नाडोः "तिरूचिरापल्ली-ताल्लुक" इत्यत्र स्थितस्य "उईयाकोण्डन-उदेयारस्य" द्वादशशताब्दस्य कस्मिंश्चित् अभिलेखे ब्राह्मणानाम् एकस्याः सभायाः विचारविमर्शस्य वर्णनं प्राप्तं भवति । ते रथकाराणाम् (रथानां निर्म्माणकर्त्तारः) सामाजिकस्थितेः विषये विचारविमर्शं कुर्वन्तः आसन् । तैः अस्याः जातेः कार्याणि निर्धारितानि येषु वास्तुकला, रथनिर्माणम्, याननिर्माणम्, मन्दिर-द्वारस्य निर्माणम्, मूर्तिस्थापनम्, बलिनिमित्तं काष्ठनिर्मितानां वस्तूनां सज्जीकरणम्, मण्डपनिर्माणं तथा च राज्ञः कृते आभूषणनिर्माणम् इत्यादीनि सम्मिलितानि आसन् ।

एकादशशताब्दं तथा च द्वादशशताब्दं यावत् क्षत्रियेषु नूतनानां राजपूत-गोत्राणां शक्तिः वर्धिता । ते हूण-चन्देल-चालुक्येभ्यः तथा च केचन अन्याभ्यः वंशपरम्पराभ्यः आयान्ति स्म । एतेषु केचन पूर्वं जनजातिषु भवन्ति स्म तथा च अनन्तरकाले कानिचन कुलानि "राजपूताः" इति मतानि । तैः शनैः शनैः पुरातनशासकानां स्थानं स्वीकृतम् । विशेषतः

कृषिक्षेत्रेषु । अत्र बहुविधानि परिवर्तनानि जायमानानि आसन् तथा च शासकैः शक्तिशालिराज्यानां निर्माणे स्वस्याः सम्पदः उपयोगः कृतः।

जनजातीयजनाः शासकरूपेण राजपूतगोत्राणाम् उदयं किमपि उदाहरणरूपेण अनुसृतवन्तः । मन्दं मन्दं ब्राह्मणानां समर्थनात् अनेकाः जनजातयः, जातिव्यवस्थायाः भागाः अभवन् । परन्तु केवलं प्रमुखाः जनजातीय-कुटुम्बाः एव शासकवर्गे सम्मेलितुं शक्तवन्तः। तेषां महती जनसङ्ख्या एव समाजस्य निम्नजातिषु एव स्थानम् अवाप्नोत्। अपरस्मिन् पक्षे पञ्चनदस्य सिन्धस्य तथा च उत्तर-पश्चिम-सीमायाः प्रभुत्वशालिन्यः जनजातयः बहुपूर्वम् इस्लामं स्वीकृतवत्यः आसन्। इमाः जनजातयः जातिव्यवस्थां निषेधयन्त्यः आसन् । सनातन-हिन्दुधर्मेण प्रस्ताविता असमाना सामाजिकीव्यवस्था एतेषु क्षेत्रेषु महता परिमाणेन न स्वीकृता।

राज्यानाम् उत्पत्तिः, जनजातीयजनानां मध्ये जातेन सामाजिक-परिवर्तनेन सूक्ष्मतया सम्बद्धा वर्तते। अस्माकम् इतिहासस्य अस्य महत्त्वपूर्णस्य भागस्य उदाहरणद्वयम् अधोलिखितं वर्तते।



**चित्रम् ५**
**गोण्डमहिला**

**स्थानान्तरीया कृषिः**

कस्यचित् वनप्रान्तस्य वृक्षाणां स्तम्बकानां च कर्तनं कृत्वा ज्वालनं क्रियते। तेषां भस्मनि एव सस्यस्य वपनं क्रियते। यदा इयं भूमिः स्वीयाम् उर्वरां नाशयति, तदा भूमेः द्वितीयः खण्डः स्वच्छः क्रियते तथा च एवं प्रकारेण सस्यस्य उत्पादनं क्रियते।

### *किमपि सूक्ष्मम् ईक्षणम्*

***गोण्डजनजातिः***

गोण्डजनाः गोण्डवाना-नामक-विशाले वनप्रदेशे निवसन्ति स्म । ते स्थानान्तरितां कृषिम् अर्थात् स्थानस्य वारं वारं परिवर्तनं कृत्वा कृषिं कुर्वन्ति स्म। विशाला गोण्डजनजातिः अनेकेषु लघुषु कुलेषु अपि विभक्ता आसीत् । प्रत्येकं कुलस्य स्वस्य राजा अथवा रायः भवति स्म। यस्मिन् समये देहल्याः सम्राजां शक्तिः क्षीयमाणा आसीत्, तस्मिन्नेव समये कानिचन प्रभुत्वसम्पन्नानां विशाल-गोण्डराज्यानां शासकाः लघुगोण्डनायकेषु नियन्त्रणं कुर्वन्तः आसन् । अकबरस्य शासनकालस्य अकबरनामा इति इतिहासग्रन्थे उल्लिखितम् अस्ति यत् गढ-कण्टगायाः गोण्डराज्ये ७०,००० ग्रामाः आसन्।

राज्यानि "गढेषु" विभक्तानि आसन् । प्रत्येकम् अपि गढ कस्यचित् विशेषकुलस्य नियन्त्रणे आसीत्। एते पुनः चतुरशीत्याः ग्रामाणाम् एककेषु विभक्ताः भवन्ति स्म, ये "चौरासी" इति कथ्यन्ते स्म । "चौरासी" इत्येतेषाम् उपविभाजनम् "बरहोत" इत्येतेषु भवति स्म। ये द्वादश ग्रामान् मेलयित्वा निर्मिताः भवन्ति।




***मानचित्रम् – २***

***गोण्डवाना***

बृहद्-राज्यानाम् उदयः गोण्डसमाजस्य चरित्रं पर्यावर्तयत् । तेषां मूलतः समानसमाजः शनैः शनैः असमानेषु सामाजिकेषु वर्गेषु विभाजितः अभवत् । ब्राह्मणाः गोण्डराजभ्यः अनुदानरूपेण भूमिं प्राप्नुवन् तथा च अधिकाः शक्तिशालिनः अभवन् । गोण्डप्रमुखाणानाम् इच्छा अधुना राजपूतरूपेण मान्यताप्राप्तेः अभवत् । एतदर्थं गढकण्टगायाः गोण्डराज्ञा अमनदासेन सङ्ग्रामशाहस्य उपाधिः धारितः । तस्य पुत्रेण दलपतेन महोबायाः चन्देल-राजपूत-राज्ञः सालबाहनस्य पुत्र्या राजकुमार्या दुर्गावत्या सह विवाहः कृतः ।

दलपतस्य मृत्युः अल्पे वयसि एव अभवत् । रानी दुर्गावती अतीव योग्या आसीत् तथा च सा स्वस्य पञ्चवर्षीयस्य पुत्रस्य वीरनारायणस्य नाम्नि शासनस्य दायित्वं स्वीकृतम् । तस्याः कार्यकाले राज्यस्य अधिकः विस्तारः अभवत् । मुगलसेनाभिः आसिफखानस्य नेतृत्वे १५६५ तमे वर्षे गढकण्टगायाः उपरि आक्रमणं कृतम् । रानी दुर्गावती एतस्य दृढतया समक्षीकरणं कृतवती । तस्याः पराजयः अभवत् अपि च सा समर्पणस्य अपेक्षया मरणम् एव वरम् इति अचिन्तयत् । तस्याः पुत्रः अपि तत्क्षणम् एव युद्धं कुर्वन् मरणं प्राप्नोत् ।



**चित्रम् – ६**

**एकं नक्काशीदार-द्वारम्, गोण्डजनजातिः, बस्तरक्षेत्रम्, मध्यप्रदेशः**

गढकटङ्गा किञ्चन समृद्धं राज्यम् आसीत् । अनेन गजानां ग्रहणस्य तथा च अन्यराज्येषु तेषां निर्यातकरणस्य वाणिज्ये बहुधनम् अर्जितम् । यदा मुगलाः गोण्डान् पराजितवन्तः तदा ते बहुमूल्यानि नाणकानि तथा च गजान् अधिकमात्रायाम् अपहृतवन्तः । ते राज्यस्य एकं भागं स्वाधीनम् अकुर्वन् तथा च अवशिष्टं भागं बीरनारायणस्य पितृव्यं चन्दरशाहं दत्तवन्तः । गढकटङ्गायाः पतनम् अभवत् तदा अपि गोण्डराज्यं किञ्चित् कालं यावत् प्रचलत् आसीत् । परन्तु ते अतीव क्षीणाः जाताः आसन् । तथा च अनन्तरकाले अधिकशक्तिशालीनां बुन्देलानां तथा च मराठानां विरुद्धं तेषां सङ्घर्षाः असफलाः जाताः ।

?

**चर्चयन्तु**

मुगलाः गोण्डप्रदेशे अधिग्रहणं किमर्थं कर्तुम् इच्छन्ति स्म ?

**अहोमः**

अहोमजनाः त्रयोदश्यां शताब्द्यां वर्तमान-म्यानमारात् आगत्य ब्रह्मपुत्रनद्याः उपत्यकायां वासम् कृतवन्तः । ते भुइयाँजनानाम् (भूस्वामिनाम्) पुरातन-राजनीतिक-व्यवस्थायाः दमनं कृत्वा नूतनराज्यस्य स्थापनां कृतवन्तः । तैः षोडशशताब्दस्य काले चुटीनाम् (१५२३) तथा च कोच-हाजोजनानाम् (१५८१) राज्यानि स्वराज्ये मेलितानि । ते बह्वीः अन्याः जनजातीः अपि स्वाधीनं कृतवन्तः । अहोमाः कस्यचित् विशाल-राज्यस्य निर्माणम् अकुर्वन् तथा च एतदर्थम् १५३० तमे दशके एव आग्नेय-अस्त्राणाम् उपयोगं कृतवन्तः । ते १६६० पर्यन्तम् उच्चस्तरीय-आग्नेयचूर्णस्य शतघ्नीनां च निर्माणे सक्षमाः अभवन् ।

परन्तु अहोमजनैः दक्षिण-पश्चिमात् बहूनाम् आक्रमणानां सम्मुखीकरणं करणीयम् अभवत् । मुगलाः मीर-जुमलायाः नेतृत्वे १६६२ तमे वर्षे अहोमराज्ये आक्रमणं कृतवन्तः । शूरतापूर्वकं सम्मुखीकरणं कृत्वा अपि अहोमजनाः पराजयं प्राप्नुवन् । परन्तु तस्मिन् क्षेत्रे मुगलानां प्रत्यक्षनियन्त्रणम् अधिकं कालं यावत् स्थातुं न अशक्नोत् ।

अहोमराज्यम् आजूपरम्परायाम् आश्रितम् आसीत् । ये जनाः राज्याय बलात् कार्यं कुर्वन्ति स्म, ते 'पाइक' इति कथ्यन्ते स्म । अहोमराज्ये काचित् जनगणना कृता आसीत् । प्रत्येकेन ग्रामेण स्वक्रमस्य आगमने निश्चितसङ्ख्यायाम् 'पाइक' इति प्रेषणीयाः भवन्ति स्म । एतदर्थं जनगणनायाः अनन्तरं सघन-जनसङ्ख्यात्मकेभ्यः क्षेत्रेभ्यः

**मानचित्रम् ३**

*पूर्वीभारतस्य जनजातयः*





**चित्रम् ७**

**कर्णाभरणम्, कबोईनागाजनजातिः मणिपुरम्**

?

भवतां विचारानुसारं मुगलाः अहोमप्रदेशं जेतुं किमर्थं प्रयत्तवन्तः ?

अल्पसघन-जनसङ्ख्यात्मकेषु जनानां स्थानान्तरणं कृतम् आसीत् । अनेन प्रकारेण अहोमकुलानि नष्टानि अभवन् । सप्तदशशताब्दस्य पूर्वार्धस्य अन्तं यावत् प्रशासनम् उत्तमरीत्या केन्द्रीभूतं जातम् आसीत् ।

प्रायेण सर्वे वयस्कपुरुषाः युद्धकाले सेनायां स्वीयां सेवां प्रयच्छन्ति स्म । युद्धकालं विहाय बन्धनिर्माणे सेचन-व्यवस्थादीनां निर्माणे अथवा अन्येषु सार्वजनिकेषु कार्येषु संलग्नाः भवन्ति स्म । अहोमजनाः तण्डुलानां कृषिनिमित्तं नूतनानाम् उपायानाम् अपि प्रयोगम् अकुर्वन् ।

अहोमसमाजः कुलेषु विभाजितः आसीत् । यः 'खेल' इति कथ्यते स्म । तत्र शिल्पकारिणां न्यूनाः जातयः आसन् । एतदर्थम् अहोमक्षेत्रे शिल्पकाराः निकटवर्तिभ्यः क्षेत्रेभ्यः आगताः आसन् । कस्यचित् "खेल" इत्यस्य नियन्त्रणे प्रायेण बहवः ग्रामाः भवन्ति स्म । कृषकान् स्वस्य ग्रामसमुदायेन भूमिः प्रदीयते स्म । समुदायस्य सहमतिं विना राजा अपि एतां प्रति न स्वीकर्तुं शक्नोति स्म ।

आरम्भे अहोमजनाः, स्वस्य जनजातीयानां देवतानाम् उपासनां कुर्वन्ति स्म । परन्तु सप्तदशशताब्दस्य पूर्वार्द्धे ब्राह्मणानां प्रभावे वृद्धिः अभवत् । मन्दिराणां कृते ब्राह्मणानां कृते च राज्ञा भूमिः अनुदानरूपेण प्रदत्ता । शिवसिंहस्य (१७१४ -४४) काले हिन्दूधर्मः तत्रत्यः प्रधानधर्मः जातः। परन्तु अहोमराजानः हिन्दूधर्मस्य आत्मसात्करणात् पश्चात् स्वस्य पारम्परिकाः आस्थाः पूर्णतया न अत्यजन् ।

अहोमसमाजः कश्चन अत्यन्तं परिष्कृतः समाजः आसीत् । कविभ्यः विद्वद्भ्यः च अनुदानरूपेण भूमिः प्रदीयते स्म । नाट्य-कर्मणः कृते प्रोत्साहनं प्रदीयते स्म । संस्कृतस्य महत्त्वपूर्णानां कृतीनाम् अनुवादः कृतः आसीत् । "बुरञ्जी" इति ऐतिहासिकीनां कृतीनां लेखनं पूर्वम् अहोमभाषया पश्चात् च असमभाषया कृतम् ।

### निष्कर्षः

यस्य युगस्य चर्चा अस्माभिः क्रियते, तस्य युगस्य काले उपमहाद्वीपे महत् सामाजिकं परिवर्तनम् अभवत् । वर्णाधारितः समाजः जनजातीय-जनाः परस्परं निरन्तरं सम्पर्के आगच्छन्तः आसन् ।

अनेन आदानेन प्रदानेन उभयविधे समाजे अनुकूलनस्य परिवर्तनस्य च प्रक्रिया प्रारब्धा । अनेकाः विविधप्रकारिकाः जनजातयः आसन्, तथा च ताभिः विभिन्नप्रकारिकाः जीविकाः अङ्गीकृताः । कालान्तरे एतासु बह्व्यः जात्याधारिते समाजे सम्मिलिताः अभवन् । परन्तु काभिश्चन जातिव्यवस्था सनातन-हिन्दू-धर्मः च इत्येतयोः द्वयोः अपि अङ्गीकरणं न कृतम् । काभिश्चित् जनजातिभिः सुसङ्गठित-प्रशासनिक-व्यवस्थापकानां विस्तृतराज्यानां स्थापना कृता । एवं प्रकारेण इमाः राजनैतिकरूपेण शक्तिशालिन्यः अभवन् । अनेन एतासां जनजातीनां बृहत्तरैः अधिकजटिल-साम्राज्यैः च सह सङ्घर्षस्य स्थितिः उत्पन्ना अभवत् ।

## मङ्गोलः

*स्वस्य मानचित्रे मङ्गोलियाम् अन्वेषयन्तु । इतिहासे सर्वाधिका प्रसिद्धा पशुचारिणी तथा च आखेटसङ्ग्राहिका जनजातिः मुगलानाम् आसीत् । ते मध्य-एशियायाः घासक्षेत्रेषु तथा च किञ्चित् उत्तरभागं प्रति वनप्रान्तेषु निवत्स्यमानाः आसन् । १२०६ तमे वर्षे चङ्गेज-खानः मङ्गोलेषु तथा च तुर्की-जनजातिषु ऐक्यम् उत्पाद्य एताः जनजातीः कस्मिंश्चित् शक्तिशालिनि सैन्यबले पर्यवर्तयत् । सः स्वमृत्युसमये (१२२७) कस्यचित् सुविस्तृतप्रदेशस्य शासकः आसीत् । तस्य उत्तराधिकारिणः कस्यचित् एकस्य विशालतमस्य साम्राज्यस्य स्थिरीकरणम् अकुर्वन् । विभिन्नकालखण्डेषु रूसस्य, पूर्वीयूरोपस्य, चीनस्य तथा च दक्षिणैशियायाः बृहद्-भागः अस्य साम्राज्यस्य शासनाधीनः आसीत् । मङ्गोलानां पार्श्वे सुसङ्गठितं सैन्यं तथा च प्रशासनिक्यः व्यवस्थाः आसन् । एताः व्यवस्थाः विभिन्नजातीनाम् एवञ्च धार्मिक-समूहानां समर्थने आश्रिताः आसन् ।*

**कल्पनां कुर्मः**



*भवन्तः कस्यचित् एतादृशस्य यायावरसमुदायस्य सदस्याः सन्ति, यः प्रत्येकं मासत्रयानन्तरं निवासस्थानं परिवर्तयति । भवतां जीवनस्य उपरि अस्य कः प्रभावः भविष्यति ?*

पुनः स्मरन्तु

१ *अधोलिखितानां मेलनं कुर्वन्तु-*

| | |
|---|---|
| *गढः* | *खेलः* |
| *टाण्डा* | *चतुरशीतिः* |
| *श्रमिकः* | *जीवनशैली* |

| | |
|---|---|
| *कुलम्* | *गढ-कटङ्गा* |
| *शिव-सिंहः* | *आहोम-राज्यम्* |
| *दुर्गावती* | *पाइकः* |

२ *रिक्तस्थानानां पूर्तिं कुर्वन्तु –*

*(क) वर्णानाम् अन्तः उत्पद्यमानाः नवीनाः जातयः---------कथ्यन्ते स्म ।*

*(ख) --------------अहोमजनैः लिखिताः ऐतिहासिक्यः कृतयः आसन् ।*

*(ग) ---अस्य विषयस्य उल्लेखः कृतः यत् गढ-कटङ्गायाम् ७०,००० ग्रामाः आसन् ।*

*(घ) विशालेषु तथा च शक्तिशालिषु भूते सति जनजातीयैः राज्यैः --------च--- ----------भूमि-अनुदानानि प्रदत्तानि ।*

३ *उचितम् अनुचितं वा सूचयन्तु---*

*(क) जनजातीयानां समाजानां समीपं समृद्ध-वाचकपरम्पराः आसन् ।*

*(ख) उपमहाद्वीपस्य उत्तर-पश्चिमभागे कश्चन जनजातीयः समुदायः न आसीत् ।*

*(ग) गोण्डराज्येषु अनेकेषां नगराणां मेलयित्वा "चौरासी" इति निर्मितं भवति स्म ।*

*(घ) भीलाः उपमहाद्वीपस्य उत्तर-पूर्वीभागे निवसन्ति स्म ।*

४ *यायावर-पशुचारकाणाम् एकस्मिन् स्थाने वासं कुर्वतां कृषकाणां च मध्ये कीदृशः विनिमयः भवति स्म ?*

आगच्छन्तु अवगच्छामः

५ *अहोम-राज्यस्य प्रशासनं कथं सङ्घटितम् आसीत् ?*

६ *वर्ण-आधारिते समाजे कानि परिवर्तनानि अभवन् ?*

७ *राज्यरूपेण सङ्घटनानन्तरं जनजातीयः समाजः कथं परिवर्तितः?*

आगच्छन्तु विचारयामः

८ *किं बञ्जारजनाः अर्थव्यवस्थायै महत्त्वपूर्णाः आसन् ?*

९ *गोण्डजनानाम् इतिहासः, अहोमजनानाम् इतिहासात् केन प्रकारेण भिन्नः आसीत् ? किं काचित् समानता अपि आसीत् ?*

आगच्छन्तु कृत्वा

१० *मानचित्रे अस्मिन् अध्याये उल्लिखितानां जनजातीनां क्षेत्राणि चिह्नितानि कुर्वन्तु । कयोश्चित् द्वयो सम्बन्धयोः चर्चां कुर्वन्तु यत् किं तेषां जीविकोपार्जन-विधिः स्वक्षेत्राणां भौगोलिक-विशेषतानां तथा च पर्यावरणस्य अनुरूपः आसीत् ?*

**बीजशब्दः**

वर्णः

जातिः

टाण्डा

गढम्

चतुराशीतिः

बरहोतः

भुईयाँ

पाइकः

खेलः

बुरञ्जी

जनगणना

*११ जनजातीय-समूहसम्बद्धानां वर्तमानानां सर्वकारीयाणां नीतीनां ज्ञानं कुर्वन्तु तथा च तेषां विषये चर्चायाः आयोजनं कुर्वन्तु ।*

*१२ उपमहाद्वीपे वर्तमानानां यायावर-पशुचारिणां समूहानां विषये ज्ञानं कुर्वन्तु । ते कान् जन्तून् स्थापयन्ति ? ते प्रायः केषु क्षेत्रेषु गमनं कुर्वन्ति ?*